MASTER OF ARTS EXAMINATION, 2025
(2nd Year, 4th Semester)
SANSKRIT
Course: XIX/B
[Vedic Ritual Texts]

Full Marks: 30 | Time: Two Hours

*The figures in the margin indicate full marks.*

सर्वमुत्तरं संस्कृतभाषया देवनागरीलिप्यां प्रदेयम्।

1. अधस्तनेषु प्रश्नमेकमाश्वलायनश्रौतसूत्रमाश्रित्य समाधत्त। 6

(a) वेदाङ्गरूपेण श्रौतसूत्राणां प्रयोजनमाश्रित्य कश्चन प्रबन्धो विरचनीयः।

(b) "तस्य नित्याः प्राञ्चश्चेष्टाः"-इतिसूत्रस्थिते अन्तिमे पदद्वये विषमलिङ्गप्रयोगहेतुत्वं विस्पष्टीक्रियताम्।

(c) आश्वलायनश्रौतसूत्रान्तर्गतानि विनियोगविधायकसूत्राणि दृष्टान्तयोगेन व्याख्येयानि।

2. अधोगतेषु आश्वलायनश्रौतसूत्रेषु व्याख्यायतां सप्रकरणमेकं सूत्रम्। 4

(a) अग्न्याधेयप्रभृतीन्याह वैतानिकानि।

(b) एकाङ्गवचने दक्षिणं प्रतीयात्।

(c) जपानुमन्त्रणाप्यायनोपस्थानान्युपांशु।

3. अधोनिर्दिष्टेषु आश्वलायनगृह्यसूत्रेषु एकं सप्रसङ्गं व्याख्यायताम्। 6

(a) हुता अग्नौ हूयमाना अनग्नौ प्रहुता ब्राह्मणभोजने ब्रह्मणिहुतः॥

(b) अग्न आयूंषि पवस इति तिसृभिः प्रजापते न त्वदेतान्यन्य इति च व्याहृतिभिर्वा।

(c) उदगयन आपूर्यमाणपक्षे कल्याणे नक्षत्रे चौलकर्मोपनयनगोदानविवाहाः।

4. निम्ननिर्दिष्टेषु पदद्वयस्य टीका आश्वलायनगृह्यसूत्रानुसारेण प्रदेया। 2x2=4

(a) दैवो विवाहः।

(b) अवदानधर्मः।

(c) ब्राह्मो विवाहः।

5. निम्नोक्तेषु प्रश्नमेकं यज्ञतत्त्वप्रकाशमाश्रित्य समाधत्त। 6

(a) आधानं किम्? काश्च पवमानेष्टयः? आधानपवमानेष्टीनामङ्गाङ्गिभावः सम्यक् आलोच्यताम्।

(b) अग्निहोत्रस्वरूपं निरूप्य तस्य होमस्यानुष्ठानप्रकारो यथाविधि संक्षेपेण वर्ण्यताम्।

(c) दर्शपूर्णमासयोः दर्शे कीदृशाः विशेषाः? तत्र शुक्लप्रतिपद्दिनकृत्यं वैशद्येन निरूप्यताम्।

6. निम्नप्रदत्तेषु पदद्वयस्य यज्ञतत्त्वप्रकाशमनुसृत्य टिप्पनी विधीयताम्। 2x2=4

(a) गार्हपत्याधानम्।

(b) पार्थिवसम्भाराः।

(c) समिधः।

(d) आधानार्थदक्षिणाद्रव्याणि।

******